[११४] वा प्रियस्य [1]पूर्वनिपातः। (म.भा. १.४३७)

[2]गुडप्रियः, प्रियगुडः।

[११५] सप्तम्याः पूर्वनिपाते [3]प्राप्ते गड्वादिभ्यः सप्तम्यन्तं [4]परम्। (म.भा. १.४३७)

गडुकण्ठः। गडुशिराः। कथं वहेगडुः? प्राप्तस्य चाबाधा व्याख्येया॥

## निष्ठा। (३६/८९९)

निष्ठान्तं च [5]बहुव्रीहिसमासे पूर्वं प्रयोक्तव्यम्। कृतकटः। [6]भिक्षितभिक्षिः। अवमुक्तोपानत्कः। [7]आहूतसुब्रह्मण्यः। ननु [8]च विशेषणमेवात्र[9] निष्ठा? नैष नियमः, [10]विशेषणविशेष्यभावस्य विवक्षा[11]निबन्धनत्वात्। कटे[12] कृतमनेन इति [13]वा विग्रहीतव्यम्[14]।

[११६] निष्ठायाः पूर्वनिपाते जातिकालसुखादिभ्यः परवचनम्। (म.भा. १.४३७)

[15]शार्ङ्गजग्धी। [16]पलाण्डुभक्षिती। [17]मासजातः। संवत्सरजातः। [18]सुखजातः। दुःखजातः। कथं कृतकटः, [19]भुक्तौदनः? प्राप्तस्य चाबाधा व्याख्येया।

[११७] प्रहरणार्थेभ्यश्च परे निष्ठासप्तम्यौ भवत इति वक्तव्यम्। (म.भा. १.४३८)

अस्युद्यतः[20]। दण्डपाणिः[21]। कथम् [22]उद्यतगदः, उद्यतासिः[23]? प्राप्तस्य चाबाधा व्याख्येया॥

## वाऽऽहिताग्न्यादिषु। (३७/९००)

निष्ठा इति [24]पूर्वनिपाते प्राप्ते विकल्प उच्यते। आहिताग्न्यादिषु निष्ठान्तं [25]पूर्वं वा प्रयोक्तव्यम्। अग्न्याहितः, आहिताग्निः। [26]जातपुत्रः, पुत्रजातः। जातदन्तः। जातश्मश्रुः। तैलपीतः। [27]घृतपीतः। ऊढभार्यः। गतार्थः। आकृतिगणश्चायम्, तेन गडुकण्ठप्रभृतय इहैव द्रष्टव्याः॥

## कडाराः कर्मधारये। (३८/७५१)

गुणशब्दानां विशेषणत्वात् पूर्वनिपाते प्राप्ते विकल्प उच्यते। कडारादयः [28]कर्मधारये समासे वा पूर्वं [29]प्रयोक्तव्याः। कडारजैमिनिः, जैमिनिकडारः।

---

1. पूर्वनिपातः नास्ति ड.इ. 2. गुरुप्रियः, प्रियगुरुः क. 3. प्राप्ते नास्ति इ. 4. परं वचनम् फ, परवचनं क.ड.इ.ह. 5. बहुव्रीहौ क.इ.ह. 6. भक्षितभिक्षः ब.इ, भिक्षितभिक्षः क. 7. आहूतसुब्राह्मणः ड, °सुब्राह्मण्यः क. 8. च नास्ति इ. 9. अत्र नास्ति फ. 10. विशेषण नास्ति फ. 11. °निबन्धत्वात् क. 12. कटेन वा इत्यधिकम् पमं. 13. वा नास्ति फ. 14. कृतकटः इत्यधिकम् क. 15. सारङ्गजग्धी क. ड. इ. 16. नास्ति फ, पलाण्डुभक्षती इ, °भक्षितः ब. 17. मासयातः फ. 18. सुखयातः फ. 19. भुक्तौदनः नास्ति फ. 20. मुसलोद्यतः इत्यधिकम् क. 21. असिपाणिः इत्यधिकम् क. 22. उद्यतगदः नास्ति ह. 23. इति इत्यधिकम् क. 24. नित्ये इत्यधिकम् ह. 25. वा पूर्वं ड. 26. जातपुत्रः नास्ति ह, पुत्रजातः नास्ति ब. क. 27. मद्यपीतः इत्यधिकम् ड. 28. कर्मधारयसमासे क.ड.इ. 29. प्रयोज्याः क.